Homas
the spiritual way to success
K. Krishna Prasad Bhat
Website: http://homas.in
Email: homasonline@gmail.com
Mobil: 8000858858 /9940406777



अथाघोरास्त्रमन्त्रप्रसङ्गात् मन्त्रदेवताप्रकाशिकोक्तः पाशुपतास्त्रमन्त्रोपि लिख्यते —

वामदेव ऋषिः । पङ्क्तिः छन्दः । पशुपतिर्देवता । श्लीं बीजम् । हुं शक्तिः । प्रणवादिमन्त्राक्षरैः षडङ्गन्यासः ॥ ध्यानम् —

पञ्चवक्त्रं महाबाहुं दशबाहुं त्रिलोचनम् ।
भीषणं भास्करं रुद्रं पिङ्गभ्रूश्मश्रुमूर्धजम् ॥

खड्ग-खेटक-नाराच-धनु-श्शर कमण्डलून् ।
शक्तिं शूलं च परशुं ब्रह्मदण्डं कराग्रकैः ॥

बिभ्राणं स्फटिकाभ्राभं नागाभरणभूषितम् ।
सर्वास्त्रेशं पशुपतिं सर्वरक्षाकरं स्मरेत् ॥

ओं श्लीं पशु हुं फट् । इति मन्त्रः । रक्षाप्रधानोयं मन्त्रः । अक्षरलक्षजपः । पायसेन दशांशं होमः । अथ पूजा —

प्रासादोक्तपीठे समावाह्य समर्चयेत् । तत्पुरुषादिपञ्चब्रह्मनामभिः प्रथमावरणम् । अङ्गैर्द्वितीयावृतिः । प्रासादविधाने पूर्वोक्तैः अनन्ताद्यैस्तृतीयावृतिः । उमादिभिश्चतुर्थी । ध्यानोक्तायुधैः पञ्चमी । इन्द्रादिभिष्षष्ठी ॥

अथ प्रयोगः —

ध्यानपूर्वकमन्त्रजपः सर्वभीतिनिवृत्तिकरः । एतन्मन्त्राभिमन्त्रितौषधप्रयोगः सर्वविषरोगहरः । एतन्मन्त्रहोमसंपातजपसमेतशस्त्रप्रयोगः सर्वशत्रुसेनाविध्वंसको विजयकरश्च भवति ॥

अनेन शतसंजप्तं जलं ग्रस्तमुखे क्षिपेत् ।
सद्यस्तं मुञ्चति क्रन्दन् ग्रहो मन्त्रप्रभावतः ॥